Register Number:

Date:

## ST. JOSEPH'S COLLEGE (AUTONOMOUS), BANGALORE-27

## B.A. B.SC. SANSKRIT - IV SEMESTER

## SEMESTER EXAMINATION: APRIL 2019

## SA 415 - SANSKRIT

**Time - 2 1/2 hrs** **Max Marks - 70**

I. दशानां प्रश्नानाम् एकवाक्येन संस्कृतभाषायाम् उत्तरत। 10×1=10

1. सर्वजनसाधारणं किम्?

अ. 'सत्यवादिनी' इति कस्याः विशेषणम्?

आ. प्रद्योतस्य पुत्री का?

इ. भासस्य त्रयोदशनाटकानि उपलभ्यन्ते इति केन उक्तम्?

ई. उदयनस्य द्वितीयः मन्त्री कः?

उ. शरचापहीनः कामदेवः कः?

ऊ. अङ्गारवती का?

ऋ. "भासो हासः" इति केन उक्तम्?

ॠ. नाटके प्रयुक्तभाषायाः नामानि लिखत?

ऌ. अयुक्तं परपुरुषसङ्कीर्तनं श्रोतुम् इति कया उक्तम्?

ए. दूतवाक्यं किम् आश्रितं नाटकम्?

ऐ. ब्रह्मचारी कुतः आगतः?

II. सन्दर्भं वर्णयत 4×2½=10

2. नैवेदानीं तादृशश्चक्रवाका नैवाप्यन्ते स्त्रीविशेषैर्वियुक्ताः ।

3. दग्धेति ब्रुवता पूर्वं वाञ्चितोऽस्मि रुमण्वता।

4. किं वक्ष्यतीति हृदयं परिशङ्कितं मे कन्या मयाप्यपहृता न च रक्षिता सा ।

5. कथं सा न मया शक्या स्मर्तुं देहान्तरेष्वपि।

6. स्मृत्वा स्मृत्वा याति दुःखं नवत्वम् ।

III. श्लोकानाम् अन्वय-तात्पर्य-व्याकरणांशान् लिखत 3×5=15

7. इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत्।
कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः॥

8. तीर्थोदकानि समिधः कुसुमानि दर्भान्
स्वैरं वनादुपनयान्तु तपोधनानि।
धर्मप्रिया नृपसुता न हि धर्मपीडाम्
इच्छेत् तपस्विषु कुलव्रतमेतदस्याः॥

9. संबन्धिराज्यमिदमेत्य महान् प्रहर्षः
स्मृत्वा पुनर्नृपसुतानिधनं विषादः।
किं नाम दैव! भवता न कृतं यदि स्यात्
राज्यं परैरपहृतं कुशलं च देव्याः॥

10. खगाः वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम्।
परिभ्रष्टो दूराद्रविरपि च संक्षिप्तकिरणो
रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम्॥

IV. सविस्तरं लिखत 2×10=20

11. भासस्य रूपकाणाम् एककर्तृकत्वं वर्णयत।

12. भासस्य त्रयोदश रूपकाणां परिचयं कुरुत।

13. षष्ठम् अङ्कम् अधिकृत्य लिखत।

V. परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत

आसीत् कस्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः। स च विभवक्षयाद्देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्यत्र देशेऽथवा स्थाने भोगाः भुक्ताः स्वकीर्तयः। तस्मिन् विभवहीनो यो वसेत् स पुरुषाधमः॥ तस्य च गृहे लौहघटिता पूर्वपुरुषोपार्जिता तुलासीत्। तां च कस्यचित् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वपुरमागत्य तं श्रेष्ठिनमुवाच – "भोः श्रेष्ठिन्! दीयतां मे सा निक्षेपतुला"। स आह – "भोः। नास्ति सा, त्वदीया तुला मूषकैर्भक्षिता" इति। जीर्णधन आह – "भोः श्रेष्ठिन्। नास्ति दोषस्ते, यदि मूषकैर्भक्षितेति। ईदृगेवायं संसारः। न किंञ्चिदत्र शाश्वतमस्ति। परमहं नद्यां स्नानार्थं गमिष्यामि। तत् त्वमात्मीयं शिशुमेनं धनदेवनामानं मया सह स्नानोपकरणहस्तं प्रेषय" इति।

पूर्णवाक्येन लिखत 3×1 = 3

14. लौहघटिता तुला कीदृशी आसीत्?

क. वणिक्पुत्रः स्वपुरमागत्य श्रेष्ठिनं किं उवाच?

ख. श्रेष्ठी किम् अवदत्?

15. भाषिककार्यम् 4×1 = 4

ग. 'जीर्णघनः' इति कर्तुपदस्य क्रियापदं किम्?

१) अधिष्ठाने २) कस्मिंश्चित् ३) आसीत् ४) नाम

घ. 'कालम्' इति पदस्य विशेषणपदं किम्?

१) अचिरम् २) सुचिरम् ३) यथेच्छया ४) पुनः

ङ. 'परमहम्' अत्र 'अहम्' पदं कस्मै प्रयुक्तम्?

१) श्रेष्ठिने २) वणिक्पुत्राय ३) मूषकाय ४) जीर्णधनाय

च. 'अशाश्वतम्' इति पदस्य विपर्ययपदं किम्?

१) न २) किञ्चित् ३) अत्र ४) शाश्वतम्

VI. संस्कृते अनुवादं कुरुत 8

**Strong or Weak**

There was a proud tree in the forest. He was tall and strong. There was a small herb next to the tree.

The tree said, “I am very handsome and strong. No one can defeat me.” Hearing this, the herb replied, “Dear friend, too much pride is harmful. Even the strong will fall one day.”

The tree ignored the herb’s words. He continued to praise himself.

A strong wind blew. The tree stood firmly. Even when it rained, the tree stood strong by spreading its leaves.

During these times, the herb bowed low. The tree made fun of the herb.

One day, there was a storm in the forest. The herb bowed low. As usual, the tree did not want to bow.

The storm kept growing stronger. The tree could no longer bear it. He felt his strength giving way.

He tried his best to stand upright, but in the end, he fell down. That was the end of the proud tree.

When everything was calm again, the herb stood straight. He looked around. He saw that the proud tree had fallen.

**Moral: Be humble and not be proud.**